M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

Ser. 223

Title: Raghuvamsa

Patra

223

Incomplete

Raghuvamsha	Title
Kali dasa	Author
	Editor
	Year, Vols.
	Publisher
223	Remarks

त्री

नीर्ष्यानां नयहेतुरित्यपादानात्पंचमी ऋत्यविन्नस्य धनहानिरतिदुःसहेतिभावः ॥ अस्य गुरोर्मन्युः क्रोधः
॥ मन्युर्दैन्ये क्रतौ क्रुधीत्यमरः ॥ घटाइबकुधांसियासांताः घटोध्नीः कुधसोनङित्यनअदेशः ॥ बकुध्नीहि
धसोङीपू कोटिस्त्रीणाः स्पर्शयता प्रतिपादयता ॥ विश्राणनं वितरणं स्पर्शनं प्रतिपादनमित्यमरः ने
वता विनेतुमपनेतुं शक्यः ॥ ४९ ॥ तदिति ॥ तस्मात्कारणात्कल्याणपरंपराणां भोक्तारं कर्मणि

शक्तोस्य मन्युर्नवता विनेतुं गाः कोटिशः स्पर्शयता घटोध्नीः ॥ ४९ ॥ तदूर्ज्जकल्याणपरंप ॥
राणां भोक्तारमूर्जस्वलमात्मदेहं ॥ महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैंद्रमाहुः ॥ ५० ॥

षष्ठी ॥ ऊर्जो बलमस्यास्तीत्यूर्जस्वलं ॥ ज्योत्स्नातमिस्रेत्यादिना वलच्प्रत्ययांतो निपातः आत्मदेहं
रक्ष ॥ ननु गामुपेक्ष्यात्मदेहरक्षणे स्वर्गहानिः स्यादित्यत्राह ॥ महीति ॥ ऋद्धं समृद्धं राज्यं महीतलस्पर्शन
मात्रेण भूतलसंबंधमात्रेण भिन्नं ऐंद्रं [illegible] इंद्रसंबंधिपदं स्थानमाहुः स्वर्गान्न भिद्यत इत्यर्थः ॥ ५० ॥

रघुवं.टी.
पत्र
१०

एतावदिति ॥ मृगेंद्रे एतावदुक्त्वा विरते सति गुहागतेनास्य सिंहस्य प्रतिस्वनेन शिलोच्चयः पर्वतोपि प्रीत्या
तमेवार्थं क्षितिपालमुच्चैरभाषतेवेत्युत्प्रेक्षा ॥ भाषिरविसमानार्थत्वाद्द्विकर्मकः ॥ ब्रूविसुद्धिकर्मकेषु पठितः
॥ तदुक्तं ॥ दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ ब्रुविशासिगुणेन च यत्सच
ते तदकीर्तितमाचरितं कविनेति ॥५१॥ निशम्येति ॥ देवानुचरस्येश्वरकिंकरस्य सिंहस्य वाचं निशम्य
मनुष्यदेवो राजा पुनरपि उवाच किं कृतः सन् तेन सिंहेन परिध्वासितं आक्रमणं ॥ नपुंसके भावे क्तः

एतावदुक्त्वा विरते मृगेंद्रे प्रतिस्वनेनास्य गुहागतेन ॥ शिलोच्चयोपि क्षितिपालमुच्चैः प्रीत्या तमे
वार्थमभाषतेव ॥५१॥ निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच ॥ धेन्वा तदध्यासित
कातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः ॥५२॥

॥ तेन कातरेक्षणी यस्यास्तां ॥ वक्तुं श्रीदो ५
सकृप्यक्षोः सिंहागात् ... किंवा वक्ष्यतीति भीत्येव स्थित इत्यर्थः ॥ धेन्वा नि
रीक्ष्यमाणेन अत एव सुतरां दयालुः सन् सुतरामित्यत्र द्विवचनविभज्येत्यादिना सुत्राब्दात्तरप् ॥
किमेत्तिङ् अव्ययेत्यादिनाम् प्रत्ययः ॥ न धितश्चास्सर्वविभक्तिरित्यव्ययसंज्ञा ॥५२॥ ॥ ॥

किमुवाचेत्याह ॥ क्षतादिति ॥ क्षणु हिंसायामिति धातोः संपदादित्वात्क्विप् गमादीनामिति वक्तव्यादनु
नासिकलोपे तुगागमे । चक्षुरिति रूपं सिद्धं ॥ क्षतान्नाशात्त्रायत इति क्षत्रं ॥ सुपीति योगविभागात्कः
॥ नामेतां सुत्सन्निं कविरर्पतो नुक्रामति ॥ क्षतादित्यादिना उदग्रः उन्नतः क्षत्रस्य क्षत्रवर्णस्य शब्दो
वाचकः क्षत्रशब्द इत्यर्थः ॥ सोयं क्षतात् नाशात्त्रायत इति व्युत्पत्त्या भुवनेषु रूढः किल प्रसिद्धः खलु

क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः ॥ राज्येन
किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा ॥५३॥ ॐ नमः ॥

तुनाश्वकर्णादिवत् केवलं रूढः ॥ किंतु पंकजादिवद्योगरूढ इत्यर्थः ॥ ततः किमित्यत्राह ॥ तस्य क्षत्रश
ब्दस्य विपरीतवृत्तेर्विपरीतव्यापारस्य क्षतत्राणमकुर्वतः पुंसो राज्येन किं ॥ उपक्रोशमलीमसैर्निंदाम रा
लिनैः उपक्रोशो जुगुप्सा च कुत्सा निंदा च गर्हणे इत्यमरः ॥ ज्योत्स्ना तमिस्रेत्यादिना मलिमसशब्दो निपा
तितः ॥ तैः प्राणैर्वा किं ॥ निंदितस्य सर्वमप्यपार्थकमित्यर्थः ॥ एतेनैकातपत्रमित्यादिना श्लोकद्वयेनोक्तं दत्तोत्त

रघुवं॰ रमितिवेदितव्यं॥५३॥ अथैकधेनोरित्यत्रोत्तरमाह॥ कथमिति॥ अनुनयः क्रोधापनयः चक्र
सेवाक्यार्थः॥ महर्षेरनुनयो वान्यासां पयस्विनीनां दोग्ध्रीणां गवां विश्राणनाद्दानात्कथं नु शक्य
१९ इत्यर्थः॥ अत्र हेतुमाह॥ इमां गां सुरभेः कामधेनोः पंचमीविभक्त इति पंचमी॥ अनूनामन्यूनांत्व

कथं नु शक्योऽनुनयो महर्षेर्विश्राणनाद्दान्यपयस्विनीनां॥ इमा
मनूनां सुरभेरवेहि रुद्रौजसा तु प्रहृतं त्वयास्यां॥५४॥ ॐनमः॥

वेहि जानीहि॥ तर्हि कथमस्यां परिभवो न्यूनादित्याह रुद्रेति॥ अस्यां गवि त्वया कर्त्रा प्रहृतं तु प्रहार
स्तु॥ नपुंसके भावे क्तः॥ रुद्रौजसा ईश्वरसामर्थ्येन न तु न वेत्यर्थः॥ सप्तम्यधिकरणे चेति सप्तमी
५४

तर्हि किं विकीर्षितमित्यत्राह॥ सेयमिति॥ सेयं गौर्मया निष्क्रीयते प्रत्याक्रियते नेन परगृहीतमिति
निष्क्रयः॥ प्रतिज्ञापूर्वकं एरत्निति अनूप्रत्ययः स्वदेहार्पणमेव निष्क्रयस्तेन भवत्तः त्वत्तः पंचम्यास्तसि
या तू॥ मोचयितुं न्याय्यान्यायादनपेता युक्तेत्यर्थः धर्मपथ्यर्थन्यायादि नायत्त्वयः॥ एवं सति तव पारणा भो
जनं विहता न स्यात् मुनेः क्रिया होमादिः सेवार्थः प्रयोजनं न भवान्नुलुप्तो भवेन्॥ स्वप्राणव्ययेनापि स्वा

सेयं स्वदेहार्पणनिष्क्रयेण न्याय्यास्मि मोचयितुं भवत्तः॥ न पारणास्याद्विहता तवैवं
भवेदलुप्तश्च मुनेः क्रियार्थः॥५५॥ भवानपीदं परवानवैति महान्हि यत्नस्तव देवदारौ॥

मिगुरुधनं संरक्ष्यमिति भावः॥५५॥ अत्र भवानेव प्रमाणमित्याह॥ भवानिति॥ परवान्स्वामिपर
तंत्रो भवानपीदं वक्ष्यमाणमवैतिवेत्ति॥ भवता नु भूयत एवेत्यर्थः॥ शेषे प्रथम इति प्रथमपुरुषः॥ तेन
किमित्यत्राह हि यस्मात् धेनोः॥ हि हेतावधारणे इत्यमरः॥ तव देवदारौ विषये महान्प्रयत्नः॥ महताय
त रक्ष्य इत्यर्थः॥ इदमनुशब्दोक्तमर्थं दर्शयति॥

स०२

रघुवं० स्थातुमिति ॥ रक्ष्यं वस्तु विनाश्य विनाशं गमयित्वा स्वयमक्षतेनाव्रणेन नियुक्तेनेति शेषः ॥ नियोक्तुः स्वामिनो

२० ऽग्रे स्थातुं अशक्यं ॥५६॥ सर्वथा चेन्न दयाप्रतिहार्यमित्याह ॥ किमिति ॥ किमपि किं वा हंतव्यो हिंस्यः अत्र वध्योऽयम

तथैव त्वं हिंसे यत्नाद् एव शरीरं तस्मिन् दयालुर्भव ॥ ननु मुख्ये शरीरे कोऽभिनिवेशोऽत्र तत्राह ॥ एकांतेति ॥ मुपेक्ष्यामुख्य

स्थातुं नियोक्तुर्न हि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन ॥५६॥ किमप्यहिंस्यस्तव चेन्मतोऽहं ॥
यशःशरीरे भव मे दयालुः ॥ एकांतविध्वंसिषु मद्विधानां पिंडेष्वनास्था खलु भौतिकेषु ५७॥

मद्विधानां मादृशानां विवेकिनां एकांतविध्वंसिषु अवश्यविनाशिषु भौतिकेषु पृथिव्यादिभूतवि
कारेषु पिंडेषु शरीरेषु अनास्था अनपेक्षा ॥ आस्था आलंबनास्थानयत्नापेक्षासु कथ्यत इति विश्वः
५७॥

२०

यो सौहार्दं रहमनुसरणीयोऽस्मीत्याह ॥ संबंधमिति ॥ संबंधं सख्यं आभाषणमालापः पूर्वकारणं यस्य तमाहुः ॥
स्यादाभाषणमालाप इत्यमरः ॥ स तादृक् संबंधो वनांते संगतयोः नौ आवयोर्वृत्तो जातः ॥ तत् ततो हे भू श्रीं
तनाथानुग शिवानुचर एतेन तस्य महत्त्वं सूचयति ॥ अत एव संबंधिनो मित्रस्य मे प्रणयं याच्ञां प्रण
यास्त्वमी विश्रंभयाच्ञाप्रेमाण इत्यमरः विहंतुं नार्हसि ॥५८॥ तथेति ॥ तथेति गामुक्तवते हरयेऽपि सिं

संबंधमाभाषणपूर्वमाहुर्वृत्तः स नौ संगतयोर्वनांते ॥ तद्भूतनाथानुग नार्हसि त्वं संबं
धिनो मे प्रणयं विहंतुं ॥५८॥ तथेति गामुक्तवते दिलीपः सद्यः प्रतिष्टंभविमुक्तबाहुः ॥ संन्य
स्तशस्त्रो हरये स्वदेहमुपानयत्पिंडमिवामिषस्य ॥५९॥

हाय ॥ कपौ सिंहे सुवर्णे च विष्णौ
वर्णे हरिं विदुरिति शाश्वतः ॥ सद्यस्तत्क्षणे प्रतिष्टंभान्निर्बंधाद्विमुक्तो बाहुर्यस्य स दिलीपो न्यस्तश
स्त्रस्त्यक्तायुधः सन् स्वदेहमामिषस्य मांसस्य ॥ पललं क्रव्यमामिषमित्यमरः ॥ पिंडं कवलमिवउ
मु पानयत् समर्पितवान् एतेन निर्ममत्वं ॥५९॥ ॐ नमः ॥ ॥ ॥

रघुवं॰ तस्मिन्निति ॥ तस्मिन्क्षणे उग्रं सिंहनिपातं उत्पश्यतः उत्प्रेक्षमाणस्य न केवलं तोत्प्रेक्षमाणस्य अवाङ्मुखस्य अधो
मुखस्य प्रजानां पालयितुः राज्ञः उपरि उपरिष्टात् ॥ उपर्युपरिष्टादिति निपातः विद्याधराणां दे
२१ वयोनिविशेषाणां हस्तैर्मुक्ता पुष्पवृष्टिः पपात ॥६०॥ उत्तिष्ठेति ॥ राज्ञाऽमृतमिवाचरती

तस्मिन्क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रं ॥ अवाङ्मुखस्योपरि पुष्प
वृष्टिः पपात विद्याधरहस्तमुक्ता ॥६०॥ उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थित
मुत्थितः सन् ॥ ददर्श राजा जननीमिव स्वां गामग्रतः प्रस्रविणीं न सिंहं ॥६१॥

त्यमृतायमानं उपमानादाचारे इति क्यच् ॥ ततः शानच् ॥ उत्थितं उत्पन्नं हे वत्स उत्तिष्ठेति वचो
निशम्य श्रुत्वा उत्थितः सन् ॥ प्रस्नवोऽस्त्यस्याः प्रस्नविनी व्रीह्यादित्वादिनिः प्रत्ययः ॥ अग्रतोऽग्रे प्रस्नवः क्षीरस्रावो अस्त्यस्याः सा प्रस्नविनी तां
गां स्वां जननीमिव ददर्श सिंहं न ददर्श ॥६१॥ इति २१

तमिति ॥ विस्मितमाश्चर्यं गतं ॥ कर्तरि क्तः ॥ तं दिलीपं धेनुरुवाच किमित्यत आह ॥ हे साधो मया मायामुद्भा
व्य कल्पयित्वा परीक्षितोसि ॥ ऋषिप्रभावान्मयि अंतकोऽपि यमोऽपि प्रहर्तुं न प्रभुर्न समर्थः ॥ अन्ये हिंस्राः घा
तुकाः ॥ शरारुर्घातुको हिंस्र इत्यमरः नमिकंपीत्यादिना रप्रत्ययः किमुत सुष्ठुतरां न वदितियोऽयं व
लवत्सु हुष्टु किमुत सत्यतीव च निर्भर इत्यमरः ६२ ॥ भक्त्येति ॥ हे पुत्र गुरौ भक्त्या मयि अनुकंपया च

तं विस्मितं धेनुरुवाच साधो मायां मयोद्भाव्य परीक्षितोसि ॥ ऋषिप्रभावान्मयि नांतको ॥
पि प्रभुः प्रहर्तुं किमुतान्यहिंस्राः ॥६२॥ भक्त्या गुरौ मय्यनुकंपया च प्रीतास्मि ते पुत्र वरं वृ ॥
णीष्व ॥ न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रसन्नां ॥६३॥ ॐ नमः

ते तुभ्यं प्रीतास्मि क्रियाग्रहणमपि कर्तव्यमिति चतुर्थी ॥ वरं देवेभ्यो वरणीयमर्थं देवाद्वृते वरः श्रेष्ठे
त्रिषु क्लीबे मनाक्प्रियमित्यमरः ॥ वृणीष्व स्वीकुरुष्व ॥ तथाहि ॥ मां केवलानां पयसां प्रसूतिं कारणं
न त्ववेहि न विद्धि ॥ किंतु प्रसन्नां मां कामान्दोग्धीति कामदुघां तामवेहि दुहः कप् घश्चेति कप्प्रत्ययः स

रघुवं० ततइति ॥ ततो मानितार्थी स्वहस्तार्जितो वीर इति शब्दो येन सः एतेनास्य दातृत्वं दैन्यराहित्यं चोक्तं स
राजा हस्तौ समानीय संधानीय [illegible] ध्येत्यर्थः वंशस्य कर्तारं ॥ अत एव रघुकुलमिति प्रसिद्धिः ॥
२२ अनंतकीर्तिं स्थिरयशसं तनयं सुदक्षिणायां ममयाचे ॥ ६४ ॥ संतानेति ॥ सापयस्विनी गौः संतानंका

ततः समानीय स मानितार्थी हस्तौ स्वहस्तार्जितवीरशब्दः ॥ वंशस्य कर्तारमनंतकी
र्त्तिं सुदक्षिणायां तनयं ययाचे ॥ ६४ ॥ संतानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्वि
नी सा ॥ दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोपभुंक्ष्वेति तमादिदेश ॥ ६५ ॥ ॐ नमः ॥

मयत इति संतानकामः ॥ कर्मण्यण् ॥ तस्मै राज्ञे तथेति कामं यथेति कामो वरः ॥ कामार्थे घञ् प्र
त्ययः ॥ तं प्रतिश्रुत्य प्रतिज्ञाय हे पुत्र मदीयं पयः पत्रपुटे पत्रनिर्मिते पात्रे दुग्ध्वा उपभुंक्ष्व पिबेति २२
॥ उपयुंक्ष्वेति वा पाठः ॥ तमादिदेश आज्ञापितवती ॥ ६५ ॥ ॥

वत्सस्येति ॥ हे मातः वत्सस्य वत्सपीतस्य शेषं वत्सपीनावशिष्टमित्यर्थः ॥ होम एवार्थः तस्य विधिरनु
ष्ठानं तस्य शेषं होमावशिष्टमित्यर्थः ॥ तव ऊधसि भवं ऊधस्यं क्षीरं ॥ शरीरावयवाच्चेति यत्प्रत्ययः ॥
रक्षिताया उर्व्याः षष्ठांशं षष्ठभागमिव ऋषेरनुज्ञामधिगम्य उपभोक्तुमिच्छामि ॥ ६६ ॥ इत्थमिति

वत्सस्य होमार्थविधेश्च शेषं गुरोरनुज्ञामधिगम्य मातः ॥ ॐ धस्यमिच्छामि तवोपभोक्तुं श्री
षष्ठांशमुर्व्या इव रक्षितायाः ॥ ६६ ॥ इत्थं क्षितीशेन वसिष्ठधेनुर्विज्ञापिता प्रीततरा बभूव ॥
तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्रममश्रमेण ॥ ६७ ॥ ॐ नमः ॥ ॥

इत्थं क्षितीशेन विज्ञापिता वसिष्ठस्य धेनुः प्रीततरा पूर्वं शुश्रूषया प्रीता संप्रति अनया विज्ञापनया प्री
ततरा अतिसंतुष्टा बभूव ॥ तदन्विता तेन दिलीपेनान्विता हैमवताधिमवत्संबंधिनः कुक्षेः गुहा
याः सकाशात् अश्रमेण अनायासेन आश्रमं प्रत्याययौ आगता ॥ ६७ ॥ ॐ नमः ॥ ॥

तस्मा इति॥ प्रसन्नेंदुरिव मुखं यस्य स नृपाणां गुरुर्दिलीपः प्रहर्षचिन्हैर्मुखरागादिभिरनुमितमनुहितं तत
स्याः धेन्वाः प्रसादमनुग्रहं प्रहर्षचिन्हैरेव ज्ञातत्वात् पुनरुक्तयेव वाचा गुरवे निवेद्य विज्ञाप्य पश्चात्प्रिया
यै शशंस कथितवान्। सिद्धकथनं पुनरुक्तिः॥ न चेह तदस्ति॥ किंतु चिन्हैः कथितप्रायत्वात्पुनरुक्तयेवेति

तस्मै प्रसन्नेंदुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य॥ प्रहर्षचिन्हानुमितं प्रियायै शशंस
वाचा पुनरुक्तयेव॥६८॥ स नंदिनीस्तन्यमनिंदितात्मा सद्वत्सलो वत्सहुतावशेषं॥
पपौ वसिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्त इवातितृष्णः॥६९॥॥ ॐ नमः॥

तयेत्युत्प्रेक्षा॥६८॥ स इति॥ अनिंदितात्मा अगर्हितस्वभावः॥ सन्सु वत्सलः प्रेमवान् सद्वत्स
लः॥ वत्सांसाभ्यां कामबले इति वत्सलच् प्रत्ययः॥ वसिष्ठेन कृताभ्यनुज्ञः कृतानुमतिः सन् वत्सस्य
हुतस्य चावशेषं पीतकृतावशिष्टं नंदिन्याः स्तन्यं क्षीरं शुभ्रं मूर्तं परिच्छिन्नं यश इवातितृष्णः सन् प
पौ॥६९॥

प्रातरिति॥ वशी वसिष्ठः॥ प्रातर्यथोक्तस्य पूर्वोक्तस्य व्रतस्य गोसेवारूपस्यांगन्तताया पारणांते॥
अंते प्रास्थानिकं प्रस्थाने नर्वं तत्कालोचितमित्यर्थः॥ कालात्ठञ् इति ठञ् प्रत्ययः॥ यथाकथंचि
ण हत्वापि काले वर्तमानत्वात्स्वस्त्ययन इष्यत इति हृत्रिकारः॥ ईयते प्राप्यते अनेनेत्ययनं स्वस्त्ययनं
शुभावहमाशीर्वादं प्रयुज्य तौ दंपती स्वां राजधानीं पुरीं प्रति प्रस्थापयामास॥७०॥ प्रदक्षिणीति

प्रातर्यथोक्तव्रतपारणांते प्रास्थानिकं स्वस्त्ययनं प्रयुज्य॥ तौ दंपती स्वां प्रति राजधानीं
प्रस्थापयामास वशी वसिष्ठः॥७०॥ प्रदक्षिणीकृत्य हुतं हुताशमनंतरं भर्तुररुंधतीं
च॥ धेनुं सवत्सां च नृपः प्रतस्थे सन्मंगलोदग्रतरप्रभावः॥७१॥॥ ॐ नमः॥

नृपो हुतमभ्यानीतिकृताह्वानं कर्मल्पणम्॥ तं भर्तुर्मुनेरनंतरं प्रदक्षिणार्तनरमित्यर्थः॥ अरुंधतीं
च सवत्सां धेनुं च प्रदक्षिणीकृत्य प्रगतादक्षिणं॥ तिष्ठद्गुप्रभृतीनि चेत्यव्ययीभावः॥ ततश्चिः अ
प्रदक्षिणं प्रदक्षिणं संपद्यमानं कृत्वा प्रदक्षिणीकृत्य॥ सद्भिर्मंगलैः प्रदक्षिणादिभिर्मंगलाचारैरुद
ग्रतरप्रभावः सन्प्रतस्थे॥७१॥॥

२५

श्रोत्रेति ॥ धर्मपत्नी सहितः सहिष्णुः वनादिक्लेशसहनशीलः ॥ स नृपः श्रोत्राभिरामध्वनिना मार्गमनु
द्घातः पाषाणादिप्रतिघातरहितोः तरावमुखपतीति सुखस्तेन रथेन पूर्णेन सकलेन मनोरथेनेव प
यौ ॥ मनोरथपक्षे ध्वनिः श्रुतिः ॥ अनुद्घातः प्रबंधनिवृत्तिः ॥ ७२ ॥ तमिति ॥ अदर्शनेन प्रवासनिमित्तेना
हितौत्सुक्यं जनितदर्शनोत्कंठं प्रजार्थेन संतानार्थेन व्रतेन नियमेन कर्शितांगं कृशीकृतं अंगं यस्य तेन

श्रोत्राभिरामध्वनिना रथेन स धर्मपत्नी सहितः सहिष्णुः ॥ ययावनुद्घातसुखेन मार्गं स्वेनेव
पूर्णेन मनोरथेन ॥ ७२ ॥ तमाहितौत्सुक्यमदर्शनेन प्रजाः प्रजार्थव्रतकर्शितांगं ॥ नेत्रैः प
पुस्तृप्तिमनाप्नुवद्भिर्नवोदयं नाथमिवौषधीनां ॥ ७३ ॥ नवोदयं नवाभ्युदयं [stain] प्रजास्त
तृप्तिमनाप्नुवद्भिरतितृष्णुभिर्नेत्रैरोषधीनां नाथं सोममिव पपुः अत्यास्थया ददृशुरित्यर्थः ॥ चंद्रप
क्षे दर्शनेन कलाक्षयनिमित्तेन प्रजार्थे लोकहितार्थं व्रतं देवतास्यः कलादाननियमः ॥ तं च सोमं पपु
र्देवाः पर्यायेणानुपूर्वशः इति व्यासः ॥ उदयश्चाविर्भावोऽभ्युत्थानं ॥ ७३ ॥ ॥ २५

पुरंदरेति ॥ पुरः पुरीरसुराणां दारयतीति पुरंदरः शक्रः पूः सर्वयोर्दारिसहोरिति खच्प्रत्ययः वाचंयम
पुरंदरौ चेति मुमागमनिपातः तस्य श्रीरिव श्रीर्यस्य स नृपः पौरैरभिनंद्यमानः ॥ उत्पताकं उच्छ्रि

पुरंदरश्रीः पुरमुत्पताकं प्रविश्य पौरैरभिनंद्यमानः ॥ भुजे भु
जंगेंद्रसमानसारे भूयः स भूमेर्धुरमाससंज ॥ ७४ ॥ ईनमः ॥ ॥

तध्वजं ॥ पताका वैजयंती स्यात्केतनं ध्वजमस्त्रियामित्यमरः ॥ पुरं प्रविश्य भुजंगेंद्रेण समान
सारे तुल्यबले ॥ सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिष्वित्यमरः ॥ भुजे भूयो भूमे[stain] धुरमास
संज अर्पितवान् ॥ ७४ ॥ ॥ ॥

रघुवं

२५

सर्ग-२

अथेति॥ अथ द्यौः सुरवर्त्म द्यौः स्वर्गसुरवर्त्मनोरिति विश्वः॥ अत्रेर्महर्षेर्नयनात्समुत्पन्नज्योतिर्यस्य तत्ता
श्रात ज्योपसर्ग इति कप्रत्ययः॥ नक्षत्रज्योतिरिव चन्द्रमिवेत्यर्थः॥ ऋक्षेशः स्यादत्रिनेत्रप्रसूत इति हलायुध
: चन्द्रस्यात्रिनेत्रोद्भवत्वमुक्तं॥ हरिवंशे नेत्राभ्यां परिसुस्राव दशधा द्योतयन्दिशः तं गर्भं विधिनादिष्टा दश
दिशो जगृहुस्तदा॥ १॥ समेत्य धारयामासुर्न च ताः समशक्नुवन्॥ सत्ताभ्यः सहसैवाथ दिग्भ्यो गर्भ
: प्रभावितः॥ २॥ पपात भावयन् लोकान् शीतांशुः सर्वभावन इति॥ सुरसरिद्गंगा वह्निना निष्ठ्यूतं विक्षिप्तं

अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः सुरसरिदिव तेजो वह्निनि … शं॥ ॥ धूतमै

॥ द्यौः ष्ठिवु निरसने इत्यनेन निष्ठीवतेर्वकारस्य ऊठ्॥ सुत्रनु त्रात्मनिष्ठ्यूतं विक्षिप्तं रिताः
समा इत्यमरः ऐशं तेजः स्कान्दमिव अत्र रामायणे गंगां प्रति पर्वते रामके वले धातुमंडितं अभिसंयोज
यामासुः पुत्रार्थं सर्वदेवताः॥ देवकार्यमिदं देवि समाधत्स्व गुणात्मन॥ शैलपुत्र्यां महत्तेजो गंगायां
तेज उत्सृज॥ देवतानां प्रतिज्ञाय गंगामभ्येत्य पावकः॥ गर्भं धारय वै देवि देवतानामिदं प्रियं ३ इ
त्येतद्वचनं श्रुत्वा दिव्यं रूपमधारयत्॥ न स्या महिमानं दृष्ट्वा समंताद्वकीर्यत॥ ४ २५

समंततस्तदा देवीमभ्यासत्र पावकः॥ सर्वस्रोतांसि पूर्णानि गंगाया रघुनन्दनेति॥ ५॥ राज्ञी सु
दक्षिणा नरपतेर्दिलीपस्य कुलवृद्धये संततिलक्षणाय गुरुभिर्महद्भिर्लोकपालानामनुभावैस्तेजो
भिरभिनिविष्टं गर्भमाधत्त दधावित्यर्थः॥ अत्र मनुः॥ अष्टानां लोकपालानां वपुर्धारयते नृप इति॥
आधत्तेत्यनेनात्र स्त्रीकर्तृकधारणमात्रमुच्यते तथा च मंत्रे दृश्यते॥ यथेयं पृथ्वी मह्युत्ताना गर्भमाधत्ते

भिर

नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी गुरुभिरभिनिविष्टं लोकपालानुभावैः॥ ७५॥ इति श्री॥
रघुवंशे महाकाव्ये कवि श्रीकालिदासकृतौ नंदिनीवरप्रदानो नाम द्वितीयः सर्गः॥ २॥

वं तं गर्भमाधेहि दशमे मासि सवितवे इत्याश्वलायनानां सीमन्ततंत्रे स्त्रीव्यापारधारणे शब्दप्रयोगद
र्शनादिति॥ मालिनीवृत्तमिदं॥ ननु कृतं ननमयययुतेयं मालिनी भोगिलोकैरिति लक्षणात्॥ ७५
॥ इति श्रीपदवाक्यप्रमाणपारावारीण महोपाध्याय कोलचल मल्लिनाथसूरिविरचितायां रघु
वंशव्याख्यायां संजीविनीसमाख्यायां द्वितीयः सर्गः॥ २॥

रघुवं॰टी॰
२६

सर्ग॰२

राम॰
२६